कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रीशंवंदे॥ उपमाऽनन्वयोपमेयोपमा प्रतीप रूपक परिणामोल्लेख स्मृति भ्रांति संदेहाऽपन्हवोत्प्रेक्षातिशयोक्ति तुल्ययोगिता दीपक प्रतिवस्तूपमा दृष्टांत निदर्शना व्यतिरेक सहोक्ति विनोक्ति समासोक्ति परिकर परिकरांकुर श्लेषाऽप्रस्तुतप्रशंसा प्रस्तुतांकुर पर्यायोक्ति व्याजस्तुति व्याजनिंदाऽक्षेपविरोधाभास विभावना विशेषोक्त्यसंभवा संगति विषम सम विचित्राधिकाल्पान्योन्यविशेष व्याघात कारणमालैकावली मालादीपकसार यथासंख्य पर्याय परिवृत्ति परिसंख्या विकल्प समुच्चय कारकदीपक समाधि प्रत्यनीक काव्यार्थापत्ति काव्यलिंगार्थांतरन्यास विकस्वर प्रौढोक्ति संभावन मिथ्याध्यवसिति ललितप्रहर्षण विषादनोल्लासाऽवज्ञाऽनुज्ञा लेशमुद्रा रत्नावली तद्गुणपूर्वरूपातद्गुणानुगुण मीलितसामान्योन्मीलित विशेषकोत्तरचित्रसूक्ष्म पिहितव्याजोक्ति गूढोक्ति विवृतोक्ति युक्ति लोकोक्ति छेकोक्ति वक्रोक्ति स्वभावोक्ति भाविकोदात्तात्युक्ति निरुक्ति प्रतिषेध विधि हेतवः॥ ॥इत्थं शतमलंकारा लक्षयित्वा निदर्शिताः॥ प्राचामाधुनिकानां च मतान्यालोच्य सर्वशः॥ श्रीशंवंदे॥

Acc. No. ~~7337~~ M-1712

Title - कुवलयानन्दकारिका.

Author - ?

Date - ?

Sub - ?

Folio - 9

Xerox - 18

KKSU LIBRARY
RAMTEK
441 106
M-1712
Dist. Nagpur

Checked 2012

कलुप्ता १ धर्मलुप्ता २ धर्मवाचकलुप्ता ३ वाचकोपमेयलुप्ता ४ वाचकोपमानलुप्ता ५ उपमानलुप्ता ६ धर्मोपमानलुप्ता ७ धर्मोपमानवाचकलुप्ता ८ इत्यष्टधा लुप्तोपमा॥ अत्र कांत्येति विशेषणसामर्थ्यात्स्वालानं स्मरवधूमिवाचरंतीत्यर्थस्य गम्यमानतया स्वालानं उपमेयस्य सहोपमावाचकेन लोपः॥५॥ यत्तयेति॥ यत्तया तन्व्या मेलनं समागमः तत्काकतालं। काकतालेन समागमसदृशं। काकतालपदयोर्लक्षणया काकागमनतालपतनपरत्वात्॥ काकागमनमिव तालपतनमिवेति काकतालं। काकतालमित्यत्र काकतालसमागमरूपोपमानस्य उपमावाचकस्य च लोपाद्वाचकोपमानलोपः। यत्तयेत्यत्रैव अवितर्कितसंभवमित्यसाधारणधर्मानुपादाने अभवत्किं ब्रवीमि तत् इति पाठे धर्मोपमानवाचकलोपः॥ तद्धितोद्भवः काकतालीयं। काकतालमिव काकतालीयं। यथा पतनदलितं तालफलं काकेनोपभुक्तं तथा नयातन्वी दृशि उपभुक्ता। तद्धितोद्भवः काकतालीयमित्यत्र काकतालफलोपभोगरूपोपमानलोपः॥ अत्रैव अवितर्कितसंभवमित्यनुपादाने धर्मोपमानलोपः॥ इत्यष्टधा लुप्तोपमा॥

श्रीरिशो जयति। परस्परतपःसंपत्फलायितपरस्परौ॥ प्रपंचमातापितरौ प्रांचौ जायापती स्तुमः॥१॥ अलंकारेषु बालानामवगाहनसिद्धये॥ ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः॥२॥ उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः॥ हंसीव कृष्ण ते कीर्तिः स्वर्गगामवगाहते॥३॥ वर्ण्योपमानधर्माणामुपमावाचकस्य च॥ एकद्वित्र्यनुपादानाद्भिन्ना लुप्तोपमाष्टधा॥४॥ तडिद्गौरींदुतुल्यास्या कर्पूरंती दृशौ मम॥ कांत्या स्मरवधूयंती दृष्टा तन्वी रहो मया॥ यत्तया मेलनं तत्र लाभो मे यच्च तद्रतेः॥ तदेतत्काकतालीयमवितर्कितसंभवम्॥६॥ उपमानोपमेयत्वं यदेकस्यैव वस्तुनः॥ इंदुरिंदुरिव श्रीमानित्यादौ तदनन्वयः॥१॥ पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता॥ धर्मोर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि॥१॥ प्रतीपमुपमानस्योपमेयत्वप्रकल्पनं॥ त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः॥१॥ अन्योपमेयलाभेन वर्ण्यस्यानादरोपि च॥ अलं गर्वेण ते वक्त्र कांत्या चंद्रोपि तादृशः॥२॥ वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः॥ कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः संति हि स्त्रियः॥३॥ वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत्॥ मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलांबुजं॥४॥ प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते॥ दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिंदुना॥५॥ इति द्वादशोपमाभेदाः॥ ५ ॥

उपमेय

वाचकलुप्ता धर्मलुप्ता धर्मवाचकलुप्ता

वाचकोपमेयलुप्ता

क्रमेण

उपमानोपमेयत्वं चेत्
अन्यद्वर्ण्यय उपमानरूपं उपमेयं चंद्रादित्तस्य लाभेन

प्रतीक अवर्ण्यस्य

प्रतीपं

किलेति वार्तायां

१

2

१

आधिक्याभेदरूपकं १ न्यूनताभेदरूपकं २ अनुभयाभेदरूपकं ३ आधिक्यताद्रूप्यरूपकं १ न्यूनताद्रूप्यरूपकं २ अनुभयताद्रूप्यरूपकं ३

अब्जस्य वीक्षणोपयोगित्वेन स्वात्मना संभवतीत्यतोऽस्य प्रसन्नदृगा
त्मना परिणामयेक्षणात्परिणामालंकारः

उपमान उपमेयस्य भिः अनुभयाभेदरूपकं

विषय्यभेदताद्रूप्यरंजनं विषयस्य यत्॥ रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तितः॥१॥ अयं हि धूर्जटिः साक्षा
द्येन दग्धाः पुरः क्षणात्॥ अयमास्ते विना शंभुस्तार्तीयीकं विलोचनं॥२॥ शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टितां॥
अस्या मुखेंदुना लब्धे नेत्रानंदे किमिंदुना॥३॥ साध्वीयमपरा लक्ष्मीरसुधासागरोत्थिता॥ अयं कलंकिनश्चंद्रान्मुख
चंद्रोतिरिच्यते॥४॥ २॥ परिणामः क्रियार्थश्चेद्विषयी विषयात्मना॥ प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा॥१॥ ब
हुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते॥ स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः॥१॥ एकेन बहु
धोल्लेखेप्यसौ विषयभेदतः॥ गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने॥२॥ ४॥ स्यात्स्मृतिभ्रांतिसंदेहैस्तदंकालं
कृतित्रयं॥ पंकजं पश्यतः कांतामुखं मे गाहते मनः॥१॥ अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पंकजं॥ पंकजं वा सुधांशुर्वेत्यस्मा
कं न हि निर्णयः॥२॥ ७॥ शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः॥ नायं सुधांशुः किं तर्हि व्योमगंगासरोरुहं॥८॥२
वर्णनीय धर्मस्य
सैव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः॥ नेंदुस्तीव्रो न निश्यर्कः सिंधोरौर्वोयमुत्थितः॥९॥ अन्यत्र तस्यारोपार्थः पर्य
स्तापह्नुतिश्च सः॥ नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं॥१०॥ भ्रांतापह्नुतिरन्यस्य शंकायां भ्रांतिवारणे॥
अपह्नवः

न्यूनाभेदरूप

अनुभयाभेद रूपक

आधिक्यताद्रू प्यरूपकं

विषयीकरणादर

फुरुषेः

उल्लेखः

स्मरणालंकारः

संदेहालंकारः

अन्यस्यारोपार्थो धर्म
निह्नव एव

२ आधिक्याभेदरूपकं
न्यूनताद्रूप्यरूपकं
उपमानं ४ उपमेयात्मना

भ्रांत्यलंकारः

चंद्रे आकाशगंगासरोरुहत्वप
लकत्वं चंद्रत्व धर्मस्य निह्नवः

३

प्रायद्युम्नक मलस्य अवोनि यततया वास्थितेर्जल
वासतपस्त्वे ना ध्यवसिताया: वस्तुत: कामिनीचरणसा
म्यप्राप्तिर्नफलमित्यफलस्य तस्या: कमलेऽसिद्धाया
श्चरणकान्तिप्राप्ते: फलत्वेन संभावनाऽसिद्धविषयाफलो
त्प्रेक्षा॥६॥

६ विषयं निगीर्य विषयिवाचकशब्देनैवग्रहणं विषयस्य विषयिरूपतयाऽध्यवसानत: आरोपनिश्चयाद्रूपकातिशयोक्तिरलंकार: स्यात्। उपमेयस्योपमानतया उपस्थिति: स: यथा नीलोत्पलशरस्य स्थाने लोचनकटाक्षयोर्ग्रहणं सर्व
कंदर्पनाध्यवसानं॥६

२ अत्रादिपदं दंभिषरूपलक्षकं छलादिपदार्था: व्याजादि: पदैर्नि
ह्नुतेर्भेदघस्याभिव्यक्तौ सत्यां कैतवापह्नुतिनामालंकार:। अत्रासत्यत्वा
२ भिधायिना कैतवपदेन नमे कान्ताकटाक्षा: किंतु स्मरनाराचा इत्यपह्न
वं प्रतीयते॥ ॥नायिकाकथं॥

तापं करोति सोत्कंपं ज्वर: किं न सखि स्मर:॥११॥ छेकापह्नुतिरन्यस्य शंकातस्तथ्यनिह्नवे। प्रजल्पन्मत्प
दे लग्न: कान्त: किं नहि नूपुर:॥१२॥ कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुते: पदै:॥ निर्यान्ति स्मरनाराचा: कान्तादृ
क्पातकैतवात्॥१३॥ संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना॥ उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे॥
१४॥ घनमलीमसं तम: शंके कोकी विरहशुष्मणा॥ लिंपतीव तमोंगानि वर्षतीवांजनं नभ:॥२॥ रक्तौ तवांघ्रियुगलौ भु
वि विक्षेपणाद्ध्रुवम्॥ त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी॥३॥ मध्य: किं कुचयोर्धृत्यै बद्ध: कनकदामभि:॥
प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति॥४॥१४॥ रूपकातिशयोक्ति: स्यान्निगीर्याध्यवसानत:॥ पश्य नीलोत्प
लद्वंद्वान्नि:सरंति शिता: शरा:॥१५॥ यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता॥ त्वत्सूक्तिषु सुधा राजन्भ्रांता: पश्यं
ति तां विधौ॥१६॥ भेदकातिशयोक्ति: स्यात्तस्यैवान्यत्ववर्णनम्॥ अन्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपते:॥ संबंधा
तिशयोक्ति: स्यादयोगे योगकल्पनं॥ सौधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलं॥१८॥ योगेप्ययोगो संबंधा

संभावनेति। अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यतादात्म्यसंभावनमुत्प्रेक्षा
सा च वस्तुहेतुफलात्मगोचरत्वेन त्रिविधा। अत्र वस्तुन: कस्यचिद्वस्त्व
न्तरतादात्म्यसंभावना प्रथमा स्वरूपोत्प्रेक्षा।१। अहेतौ हेतुभावेन
संभावना द्वितीया हेतूत्प्रेक्षा।२। अफलस्य फलत्वेन संभावनात्तृती
या फलोत्प्रेक्षा।३। अत्राद्या स्वरूपोत्प्रेक्षा [illegible] विषया उक्त
विषया चेति द्विविधा। परे हेतुफलोत्प्रेक्षे सिद्धविषये असिद्ध
विषये चेति प्रत्येकं द्विविधे। तथा चेत्थं षड्भेदभिन्नोत्प्रेक्षा॥

त्वन्मुखाभेत्यत्र चंद्रपद्मयोर्विरोधस्याभावीके
ना धिकावदनप्रभाप्राप्तिर्न हेतुर्हितत्राप्यहेतुत्वे
संभावना हेतूत्प्रेक्षा। वस्तुत: पद्मेनाधिकावदनेक्षी
ती च्छारूपाविषयस्यासत्त्वादसिद्धविषया। मध्य
इत्यत्र देहमध्यभाग: स्वयमेव कुचौ धरति। न तु कन
कदामबंधनत्वेनाध्यवसितार्थो बलित्रयरूपा सिता
पाव [illegible] मध्यकर्तृककुचधृते: कनककदामबंधनस्य फ
लत्वेनोत्प्रेक्षा फलोत्प्रेक्षा। कनकदामबंधनात्मकयाबलि
याविशिष्टत्वस्य वस्तुनो विद्यमानत्वात्सिद्धविषया॥

उक्तविषया वस्तूत्प्रेक्षा १ अनुक्तविषया वस्तूत्प्रेक्षा २ सिद्धविषया हेतूत्प्रेक्षा ३ असिद्धविषया हेतूत्प्रेक्षा ४ सिद्धविषया फलोत्प्रेक्षा ५ असिद्धविषया फलोत्प्रेक्षा ६
इत्यानेकभेदा द्रष्टव्या। अत्र प्रथमोदाहरणे निशागतमसो मैर्त्याद्धिधर्मसंबंधनिमित्तेन प्रियवियुक्तसर्वदेशस्थितचक्रवाकीवियोगाग्निधूमसमूहतादात्म्यसंभावना सत्वं तु
उत्प्रेक्षा। सा च तमसो विषयस्य कथनादुक्तविषया १ लिंपतीवेत्यत्र तमोव्यापनस्य वस्तुन: सकलेषु स्तुमलिनीकरणेनाभिमतेन तम: कर्तृकलेपनतादात्म्योत्प्रेक्षा नभ: कर्तृकांजनव
र्षणतादात्म्योत्प्रेक्षा उभयत्रापि विषयीभूततमोव्यापनस्याकथनादनुक्तविषया स्वरूपोत्प्रेक्षा। रक्तावित्यत्र चरणयुगलस्य स्वत: सिद्धे रक्तत्वे भूविक्षेपणं वस्तुतोऽन हेतुरपि हेतोः

१ अत्र मौर्व्यां शरसंधानं यदा कृतं तदानीमेव शत्रुवक्षःक्षितौ पतं
तीति हेतुकार्ययोः सहभावः सूचितः

२ अत्र नायकप्रवासप्रसक्तिमात्रेण योषि
तो नितकार्श्यं कार्यमुखेनैव प्रदर्शितम्

३ हेतुकार्ययोः पौर्वापर्यवैपरीत्ये

४ अवर्ण्यानां । वापदस्यार्थकं

तिशयोक्तिरितीर्यते ॥ त्वयि दातरि राजेंद्र स्वद्रुमान्नाद्रियामहे ॥१९॥ अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः ॥ आलिंगंति समं देव ज्यां शराश्च पराश्च ते ॥२०॥ चपलातिशयोक्तिः स्यात्कार्ये हेतुप्रसक्तिजे ॥ यास्यामीत्युदिते तन्व्या वलयो भवदूर्मिका ॥२१॥ अत्यंतातिशयोक्तिः स्यात्पौर्वापर्यव्यतिक्रमे ॥ अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥२२॥ वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता ॥ संकुचंति सरोजानि स्वैरिणीवदनानि च ॥ त्वदंगमार्दवे दृष्टे कस्य चित्ते नु भासते ॥ मालतीशशभृल्लेखा कदलीनां कठोरता ॥२३॥ हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता ॥ प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया ॥२४॥ गुणोत्कृष्टैः समीकृत्य वचोन्यातुल्ययोगिता ॥ लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ॥२५॥ वदंति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः ॥ मदेन भाति कलभः प्रतापेन महीपतिः ॥२६॥ त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं ॥ वर्षत्यंबुदमालेयं वर्षत्येषा च शर्वरी ॥ उन्मीलंति कदंबानि स्फुटंति कुटजोद्गमाः ॥२७॥ माद्यंति चातकास्तृप्ता माद्यंति च शिखावलाः ॥२८॥ वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता ॥ तापेन भ्राजते सूरः शूरश्चापेन राजते ॥२९॥ चेद्बिंबप्रतिबिंबत्वं दृष्टांतस्तदलंकृतिः ॥ त्वमेव कीर्तिमान्राजन्विधुरेव हि कांतिमान् ॥३०॥

प्रसंगे

कालिकाः

मयूराः

७ मौर्वी शिंजिनी

अंगुलीयकं

समाहिता

व्यभिचारिणी

व्यवहार

साम्यं विवक्षय

कृदिशाबकः

वर्षतीतिपदात्

वर्षमिवाचरति ३

पदावृत्तिः

अर्थावृत्तिः

पदार्थावृत्तिः

अत्र प्रस्तुतचंद्रोदयकाले वर्णनीयानां सरोजानां प्रकाशाभिहस्वैरिणीवदनानां च संकोचरूपैकक्रियान्वयः । त्वदंगेति अत्र नायिकाकोमलत्वे वर्णनीयेऽवर्ण्यानां मालत्यादीनां कठोरतारूपैकगुणान्वयः ॥ इयं प्रियाप्रति दयितोक्तिः ।

संपत् पराजयः

अत्रार्थावृत्तिः

अत्रपदार्थावृत्तिः

१ वाक्ययोरित्यनुवर्तते । धर्मयोरित्यध्याहार्यं यत्रोपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ बिंबप्रतिबिंबभावेनोपनिर्दिष्टौ तत्र दृष्टांतालंकारः । त्वमेवेत्यत्र कीर्तिकांत्योर्बिंबप्रतिबिंबभावः ॥१

वाक्ययोरिति द्विवचनमनेकाभिप्रायं ॥ यत्रोपमानोपमेयभावपरयोर्वाक्ययोरेकः समानो धर्मः भिन्नशब्दाभ्यां पृथक् निर्दिश्यते तत्र प्रतिवस्तू॰

यत्र सदृशवाक्यार्थसंबंधी यत्रैक्यारोपः उपमेयवाक्यार्थे उपमानवाक्या-
र्थाभेदारोप इति यावत् तत्र निदर्शनालंकारः ॥ यथा यद्दातुः सौम्यत्व-
२ स्य उपमेयवाक्यार्थस्य पूर्णेन्दोरकलंकत्वस्य उपमानवाक्यार्थस्य च य-
[illegible]मैक्यारोपः ॥ १ ॥ उपमेयपदार्थे उपमानपदार्थारोपः पदार्थनि॰ यथा
नेत्रयुगले नीलाम्बुजगतलीलापदार्थारोपः ॥ २ ॥ इयं सदृश्यनिबंधना ॥

७

प्रस्तुते वृत्तान्ते वर्ण्यमाने अप्रस्तुतवृत्तान्तस्य परिस्फूर्तिश्चेत्तदा समासोक्तिरलंकारः ॥ समासेन संक्षेपेण प्रस्तुता-
प्रस्तुतवृत्तान्तयोर्वचनात् ॥ उदाहरति अयमिति अत्र चंद्रस्य प्राचीदिक्कुमारमुखसंबंधित्वलक्षणे उदये वर्ण्य-
माने मुखशब्दस्य प्रारंभवदनसाधारण्याद्रक्तशब्दस्यारुणकामुकसाधारण्याच्चुम्बतीत्यस्य प्रस्तुतार्थसं-
बंधमात्रपरस्य शक्त्याऽर्थान्तरसाधारण्याच्च क्रमः शब्दगतपुंस्त्वेन नायकत्वाभिव्यक्त्या ऐन्द्रीगतस्त्रीलिं-
गेन नायिकात्वाभिव्यक्त्या ऐन्द्रीशब्दप्रतिपाद्यप्रसंबंधित्वेन परकीयात्वाभिव्यक्त्या चाप्रस्तुतपरवनितासक्तपुरु-
षवृत्तान्तः प्रतीयते ॥

३ अत्र नश्येदिति यन्नतं बोधयदि-
तियोग्यं तत्र [illegible]वद्गुणलक्षवि-
हथ्यस्य पुनाश [illegible] क्रियया विशिष्टं
तमः स्वकीययानाश [illegible] क्रियया ह-
ष्टान्तभत्याऽन्याप्यवरा जविरुद्ध-
श्चेत्तदा नश्यादित्यादि एयर्पयसापि
नमर्थं बोधयदत्र शमीमितिनिबंध-
नादसदर्थनिदर्शनालंकारः ॥ वर्ण्य

वैलक्ष्य
व्यय

वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ॥ यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलंकिता ॥ ३१ ॥ पदार्थवृत्तिमप्येके वदंत्यन्ये
निदर्शनाम् ॥ त्वन्नेत्रयुगलं धत्ते लीलां नीलांबुजन्मनोः ॥ ३२ ॥ अपरां बोधनं प्राहुः क्रियया सत्सदर्थयोः ॥ नश्येद्राजविरोधी
तिक्षीणं चंद्रोदये तमः ॥ ३३ ॥ उदयन्नेव सविता पद्मेष्वर्पयति श्रियं ॥ विभावयन्समृद्धीनां फलं सुहृदनुग्रहं ॥ ३४ ॥ व्यतिरेको
विशेषश्चेदुपमानोपमेययोः ॥ शैला इवोन्नताः संतः किंतु प्रकृतिकोमलाः ॥ ३५ ॥ सहोक्तिः सहभावश्चेद्भासते जनरंजनः ॥ दि-
गंतमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह ॥ ३६ ॥ विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते ॥ विद्या हृद्यापि सावद्या विना
विनयसंपदं ॥ ३७ ॥ तच्चेत्किंचिद्विना रम्यं विनोक्तिः सापि कथ्यते ॥ विना खलैर्विभात्येषा राजेंद्र भवतः सभा ॥ ३८ ॥ स-
मासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् ॥ अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः ॥ ३९ ॥ अलंकारः परिकरः
साभिप्राये विशेषणे ॥ सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ॥ ४० ॥ साभिप्राये विशेष्ये तु भवेत्परिकरांकुरः ॥ चतुर्णां
पुरुषार्थानां दाता देवश्चतुर्भुजः ॥ ४१ ॥ नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः ॥ सर्वदो माधवः पायात्स योऽगंगामदी- ३
धरत् ॥ ४२ ॥ अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना ॥ उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः ॥ ४३ ॥ अप्रस्तुतप्रशंसा २
स्यात्सा यत्र प्रस्तुताश्रया ॥ एकः कृती शकुंतेषु योऽन्यं शक्रान्न याचते ॥ ४४ ॥ प्रस्तुतस्य प्रस्तुतेन द्योतने प्रस्तुतांकुरः ॥

अब्जेन चंद्रः अब्जं पद्मं
१ चातकः
हरिणेन मृगेनांकरूपतया ऽऽहिता कृता सक्तिः संगो यत्रेति
चंद्रपक्षे हरिणा सूर्येण तेन कमलपक्षे ॥

१ उच्चरत् उत्पतत् कं जलं भूरि
कीलालं रुधिरं यस्यास्सा वाहिनीप-
२ तिः सेनापतिः तथा वाहिनीनां न-
दीनां पतिः समुद्रः उच्चरत् भूरिकीलालं
जलं अत्र सेनापतेर्वर्ण्यत्वं समुद्रस्या-
वर्ण्यत्वम्

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ॥ १
तदन्यस्य वचस्तुल्ये तुल्यार्थस्येति पंचधा ॥
कार्ये प्रस्तुते सति कारणस्य निमित्ते प्रस्तुते सति कार्यस्य
सामान्ये प्रस्तुते सति विशेषस्य विशेषे प्र॰ सामान्यस्य
तुल्ये प्रस्तुते सति तदन्यस्य तत्सदृशस्य वचः प्रतिपा-
दनमिति पंचधा प्रस्तुतप्रशंसा ॥

कस्यचित्किंचित्क्रियया विशिष्टस्य
चित्क्रियया परान्प्रति असतः सतो वा-
र्थस्य बोधनं यत्र निबध्यते तदपरां निद-
र्शनं सहृदया आहुः किं सादित्यं बोधनं तेन हाम-
अरम्य

नानार्थस्य शब्दस्य संप्रयोजनं श्लेषः
प्रस्तुतपरमप्रस्तुतवर्णनमप्रस्तुतप्रशंसा ॥ ०
यथा अत्राप्रस्तुतस्य चातकस्य प्रशंसा प्रस्तु-
तेऽपुरुषयाचनानिष्टमानिनिरूपणपर्यवसायि-
प्रधानभूतप्र २ ॥ स्तुतांतराभिव्यंजि- ॥
कं प्रस्तुतवर्णनं प्रस्तुतांकुरः ॥

किंभृंगसत्यांमालत्यांकेतक्याकंटकेध्नया॥४५॥पर्यायोक्तिंतुगम्यस्यवचोभंग्यंतराश्रयं॥नमस्तस्मैकृतोयेन
मुधाराहुवधूकुचौ॥४६॥पर्यायोक्तंतदप्याहुर्यद्व्याजेनेष्टसाधनं॥यामिचूतलतांद्रष्टुंयुवाभ्यामास्यतामिह॥
॥४७॥उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यांस्तुतिनिंदयोः॥कःस्वर्धुनिविवेकस्तेपापिनोनयसेदिवं॥४८॥साधु
दूतिपुनःसाधुकर्तव्यंकिमतःपरं॥यन्मदर्थेविलूनासिदंतैरपिनखैरपि॥४९॥स्तुत्यास्तुतेश्चगम्यत्वेव्याजस्तु
तिरुदाहृता॥धन्योसिभृंगयत्सअंतमुखद्युतिंबसि॥५०॥निंदायानिंदयाव्यक्तिर्व्याजनिंदेतिगीयते॥वि
धेस्तानिंद्योयस्तेप्रागेकमेवाहरच्छिरः॥५१॥आक्षेपःस्वयमुक्तस्यप्रतिषेधोविचारणात्॥चंद्रसंदर्शयात्मा
नमथवास्तिप्रियामुखं॥५२॥निषेधाभासमाक्षेपंबुधाःकेचनमन्वते॥नाहंदूतीतनोस्तापस्तस्याःकालानलो
पमः॥५३॥आक्षेपोन्योविधौव्यक्तेनिषेधेचतिरोहिते॥गच्छगच्छसिचेत्कांततत्रैवस्याज्जनिर्मम॥५४॥आभा
सत्वेविरोधस्यविरोधाभासइष्यते॥विनापितन्विहारेणवक्षोजौतवहारिणौ॥विभावनाविनापिस्यात्कारणंका
र्यजन्मचेत्॥अप्यलाक्षारसासिक्तंरक्तंतच्चरणद्वयं॥५६॥हेतूनामसमग्रत्वेकार्योत्पत्तिश्चसामता॥अस्त्रैरती
क्ष्णकठिनैर्जगज्जयतिमन्मथः॥५७॥कार्योत्पत्तिस्तृतीयास्यात्सत्यपिप्रतिबंधके॥नरेंद्रानेवतेराजन्दशत्यसि
भुजंगमः॥५८॥

7

अकारणात्कार्यजन्मचतुर्थीस्याद्विभावना॥शंखाद्वीणानिनादोयमुदेतिमहदद्भुतम्॥५९॥विरुद्धात्कार्यसं
पत्तिर्दृष्टाकाचिद्विभावना॥शीतांशुकिरणास्तन्विहंतसंतापयंतिमां॥६०॥कार्यात्कारणजन्मापिदृष्टाकाचि
द्विभावना॥यशःपयोधिरभवत्करकल्पतरोस्तव॥६१॥कार्याजनिर्विशेषोक्तिःसतिपुष्कलकारणे॥हृदिस्नेहक्ष
योनाभूत्स्मरदीपेज्वलत्यपि॥६२॥असंभवोऽर्थनिष्पत्तेरसंभाव्यत्ववर्णनम्॥कोवेदगोपशिशुकःशैलमुत्पाट
येदिति॥६३॥विरुद्धंभिन्नदेशत्वंकार्यहेत्वोरसंगतिः॥विषंजलधरैःपीतंमूर्छिताःपथिकांगनाः॥६४॥अ
न्यत्रकरणीयस्यततोऽन्यत्रकृतिश्चसा॥अपारिजातांवसुधांचिकीर्षन्द्यांतथाकृथाः॥६५॥अन्यत्क
र्तुंप्रवृत्तस्यतद्विरुद्धकृतिश्चसा॥गोत्रोद्धारप्रवृत्तोपिगोत्रोच्छेदंपुराकरोः॥६६॥विषमंवर्ण्यतेयत्रघटनाननु
रूपयोः॥क्वेयंशिरीषमृद्वंगीक्वतावन्मदनज्वरः॥६७॥विरूपकार्यस्योत्पत्तिरपर[illegible]विषमंमतम्॥कीर्तिंप्रसूते
धवलांश्यामातवकृपाणिका॥६८॥अनिष्टस्याप्यवाप्तिश्चतदिष्टार्थसमुद्यमात्॥भक्ष्याशयाहिमंजूषांद
ष्ट्वाखुस्तेनभक्षितः॥६९॥समंस्याद्वर्णनंयत्रद्वयोरप्यनुरूपयोः॥स्वानुरूपंकृतंसद्महारेणकुचमंडलं॥७०॥
सारूप्यमपिकार्यस्यकारणेनसमंविदुः॥नीचप्रवणतालक्ष्मीर्जलजायास्तवोचिता॥७१॥विनानिष्टं

व तत्सिद्धिर्यदर्थं कर्तुमुद्यमः ॥ युक्तो वारणलाभोयं स्यान्नते वारणार्थिनः ॥६८॥ विचित्रं तत्प्रयत्नश्चेद्विप
रीतफलेच्छया ॥ नमंति संतस्त्रैलोक्यादपि लब्धुं समुन्नतिम् ॥ ६९ ॥ अधिकं पृथुलाधाराद्यदाधेयाधिक्य
वर्णनम् ॥ ब्रह्मांडानि जले यत्र तत्र मांति न ते गुणाः ॥ ७० ॥ पृथ्वाधेयाद्यदाधाराधिक्यं तदपि तन्मतं ॥
कियद्वाग्ब्रह्म यत्रैते विश्राम्यंति गुणास्तव ॥ ७१ ॥ अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता ॥ मणिमा
लोर्मिका तेऽद्य करे जपवटायते ॥ ७२ ॥ अन्योन्यं नाम यत्र स्यादुपकारः परस्परं ॥ त्रियामा शशिना भाति
शशी भाति त्रियामया ॥ ७३ ॥ विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम् ॥ गतेपि सूर्ये दीपस्थास्तमश्छिं
दंति तत्कराः ॥ ७४ ॥ विशेषः सोपि यद्येकं वस्त्वनेकत्र वर्ण्यते ॥ अंतर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे ॥
७५ ॥ किंचिदारंभतोऽशक्यवस्त्वंतरकृतिश्च सः ॥ त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं ॥ ७६ ॥
स्याद्व्याघातोऽन्यथाकारि तथाकारि क्रियेत चेत् ॥ यैर्जगत्प्रीयते हंति तैरेव कुसुमायुधः ॥ ७७ ॥ सौ
कर्येणानिबद्धापि क्रिया कार्यविरोधिनी ॥ दयाचेद्बाल इति मय्यपरित्याज्य एव ते ॥ ७८ ॥ गुंफः कारणः

मालास्याद्यथाप्राक्प्रांतकारणैः ॥ नयेन श्रीः श्रियात्यागस्त्यागेन विपुलं यशः ॥ ७९ ॥ गृहीतमुक्तरीत्या
र्थश्रेणिरेकावलीमता ॥ नेत्रे कर्णांतविश्रांते कर्णौ दोस्तंभदोलिनौ ॥ ८० ॥ दोस्तंभौ जानुपर्यंतप्रलंबनमनो
हरौ ॥ जानुनी रत्नमुकुराकारे तस्य महीभुजः ॥ ८१ ॥ दीपिकैकावलीयोगान्मालादीपकउच्यते ॥ स्मर
ण हृदये तस्यास्तेन त्वयि कृता स्थितिः ॥ ८२ ॥ उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते ॥ मधुरं मधु तस्माच्च सु
धा तस्याः कवेर्वचः ॥ ८३ ॥ यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥ शत्रुं मित्रं विपत्तिं च जय रंजय भंज
य ॥ ८४ ॥ पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः ॥ पद्मं मुक्त्वा गता चंद्रं कामिनीवदनप्रभा ॥ ८५ ॥
एकस्मिन्यद्यनेकं वा पर्यायः सोपि संमतः ॥ अधुना पुलिनं तत्र यत्र स्रोतः पुराजनि ॥ ८६ ॥ परिवृत्तिर्विनि
मयो न्यूनाभ्यधिकयोर्मिथः ॥ जग्राहैकं शरं मुक्त्वा कटाक्षात्स रिपुश्रियः ॥ ८७ ॥ परिसंख्या निषिध्यैकमेक
स्मिन्वस्तुयंत्रणं ॥ स्नेहक्षयः प्रदीपेषु न स्वांतेषु नतभ्रुवाम् ॥ ८८ ॥ विरोधे तुल्यबलयोर्विकल्पालंकृतिर्म
ता ॥ सद्यः शिरांसि चापान्वा नमयंतु महीभुजः ॥ ८९ ॥ विकल्पस्तुल्यवेलायामुक्तिस्तुल्यविशेषणा ॥
कांतचित्ते धरे वापि कुरु त्वं वीतरागताम् ॥ ९० ॥ बहूनां युगपद्भावभाजां गुंफः समुच्चयः ॥ नश्यंति

श्रीशिवेऽव
५

पश्चात्सरयंति अस्यंति च भवद्विषः ॥९१॥ अहंप्राथमिकाभाजामेककार्यान्वयेपि सः ॥ कुलं रूपं वयो विद्याध
नं च मदयंत्यमुं ॥९२॥ क्रमिकैकगतानां तु गुंफः कारकदीपकं ॥ गच्छत्यागच्छति पुनः पांथः पृच्छति पश्यति ॥९३॥
समाधिः कार्यसौकर्यं कारणांतरसंनिधेः ॥ उत्कंठिता च तरुणी जगामास्तं च भानुमान् ॥९४॥ प्रत्यनीकं ब
लवतः शत्रोः पक्षे पराक्रमः ॥ जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधः कृतौ ॥९५॥ कैमुत्येनार्थसंसिद्धिः काव्या
र्थापत्तिरिष्यते ॥ स्वाजितस्त्वन्मुखेनेंदुः का वार्ता सरसीरुहां ॥९६॥ समर्थनीयस्यार्थस्य काव्यलिंगं समर्थ
नं ॥ जितोसि मंदकंदर्प मच्चित्तेस्ति त्रिलोचनः ॥९७॥ उक्तिरर्थांतरन्यासः स्यात्सामान्यविशेषयोः ॥ ह
नूमानब्धिमतरद्दुष्करं किं महात्मनां ॥९८॥ गुणवद्वस्तुसंसर्गाद्याति स्वल्पोपि गौरवं ॥ पुष्पमालानुषंगेन सू
त्रं शिरसि धार्यते ॥९९॥ बहूनामप्यसाराणां संयोगः कार्यसाधकः ॥ तृणैरारभ्यते रज्जुस्तया नागोपि बध्य
ते ॥१००॥ यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः ॥ स न जिग्ये महांतो हि दुर्धर्षाः सागरा इव ॥१॥ प्रौ
ढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनं ॥ कचाः कलिंदजातीरतमालस्तोममेचकाः ॥२॥ संभावनं यदीत्थं
स्यादित्यूहोन्यस्य सिद्धये ॥ यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव ॥ किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्या
र्थांतरकल्पनं ॥ मिथ्याध्यवसितिर्वेश्यां वशयेत्खस्रं वहन् ॥४॥ प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिंबस्य वर्णनं ॥
जं

11

ललितं निर्गते नीरे सेतुमेषा चिकीर्षति॥५॥ उत्कंठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम्॥ तामेव ध्यायते तस्मै वि
सृष्टा सैव दूतिका॥६॥ वांछितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम्॥ दीपमुद्योजयेद्यावत्तावदभ्युदितो रविः॥
यत्नादुपायसिद्ध्यर्थात्साक्षाल्लाभः फलस्य च॥ निध्यंजनौषधीमूलं खनता साधितो निधिः॥८॥ इष्यमा
णविरुद्धार्थसंप्राप्तिस्तु विषादनं॥ दीपमुद्योजयेद्यावन्निर्वाणस्तावदेव सः॥ एकस्य गुणदोषाभ्यामु
ल्लासोऽन्यस्य तौ यदि॥ अपि मां पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी॥१०॥ काठिन्यं कुचयोः स्रष्टुं वांछ
त्यः पादपद्मयोः॥ निंदंति विश्वदातारं त्वद्धाटीवीरयोषितः॥११॥ तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनम्॥
लाभोऽयमेव भूपालसेवकानां न चेद्वधः॥१२॥ ताभ्यां तौ यदि न स्यातामवज्ञालंकृतिश्च सा॥ स्वल्पमेवांबु लभते
प्रस्थं प्राप्यापि सागरं॥१३॥ मीलंति यदि पद्मानि का हानिरमृतद्युतेः॥ ॥ दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणद
र्शनात्॥ विपदः संतु नः शश्वद्यासु संकीर्त्यते हरिः॥१५॥ लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं॥ अखि
लेषु विहंगेषु हंत स्वच्छंदचारिषु॥ शुकपंजरबंधस्ते मधुराणां गिरां फलं॥१६॥ सूच्यार्थसूचनं मुद्रा
प्रकृतार्थपरैः पदैः॥ नितंबगुर्वी तरुणी दृग्युग्मविपुला च सा॥१७॥ क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं
विदुः॥ चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते॥१८॥ तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः॥ प

श्रीशिवेऽव

६

त्या

12

द्मरागायतेनासामौक्तिकंतेऽधरत्विषा॥१९॥ पुनःस्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतं॥ हरकंठांशुनीलोपिशेष
स्त्वद्यशसासितः॥२०॥ पूर्वावस्थानुवृत्तिश्चविकृतेसतिवस्तुनि॥ दीपेनिर्वापितेप्यासीत्कांचीरत्नैर्महन्महः
॥२१॥ संगतान्यगुणानंगीकारमाहुरतद्गुणं॥ चिरंरागिणिमच्चित्तेनिहितोपिनरज्यसे॥२२॥ प्राक्सिद्धस्वगु
णोत्कर्षोऽनुगुणः परसंनिधेः॥ नीलोत्पलानिदधतेकटाक्षैरतिनीलतां॥२३॥ मीलितंयदिसादृश्याद्भेदएवनलक्ष्यते॥
रसोनालक्षिलाक्षायाश्चरणेसहजारुणे॥२४॥ सामान्यंयदिसादृश्याद्विशेषोनोपलक्ष्यते॥ पद्माकरप्रविष्टा
नांमुखंनालक्षिसुभ्रुवां॥२५॥ भेदवैजात्ययोःस्फूर्तावुन्मीलितविशेषकौ॥ हिमाद्रिंत्वद्यशोमग्नंसुराःशीते
नजानते॥२६॥ लक्षितान्युदितेचंद्रेपद्मानिचमुखानिच॥ ॥ किंचिदाकूतसहितंस्याद्गूढोत्तरमुत्तरं॥ यत्रा य
सौवेतसीपांथतत्रेयंसुतरासरित्॥२७॥ प्रश्नोत्तरांतराभिन्नमुत्तरंचित्रमुच्यते॥ केदारपोषणरताःकेखेटाःकिं
चलंवयः॥२८॥ सूक्ष्मंपराशयाभिज्ञेतरसाकूतचेष्टितम्॥ मयिपश्यतिसाकेशैःसीमंतमणिमावृणोत्॥२९॥
पिहितंपरवृत्तांतंज्ञातासाकूतचेष्टितम्॥ प्रियेगृहागतेप्रातःकांतातल्पमकल्पयत्॥३०॥ व्याजोक्ति

रन्यहेतूक्त्या यदाकारस्यगोपनं॥सखिपश्यगृहारामपरागैरस्मिधूसरा॥३१॥गूढोक्तिरन्योद्देश्यंचेद्यदन्यंप्रतिक
थ्यते॥वृषापेहिपरक्षेत्रादायातिक्षेत्ररक्षकः॥३२॥विवृतोक्तिःश्लिष्टगुप्तंकविनाविष्कृतंयदि॥वृषापेहिपर
क्षेत्रादितिवक्तिससूचनं॥३३॥युक्तिःपराभिसंधानंक्रिययामर्मगुप्तये॥त्वामालिखंतीदृष्टान्यंधनुःपौष्पंकरे
लिखत्॥३४॥लोकप्रवादानुकृतिर्लोकोक्तिरितिभण्यते॥सहस्वकतिचिन्मासान्मीलयित्वाविलोचने॥३५॥
छेकोक्तिर्यत्रलोकोक्तेःस्यादर्थांतरगर्भता॥भुजंगएवजानातिभुजंगचरणंसखे॥३६॥वक्रोक्तिःश्लेष
काकुभ्यामपरार्थत्वकल्पनं॥मुंचमानंदिनंप्राप्तंनेहनंदीहरांतिके॥३७॥स्वभावोक्तिःस्वभावस्यजात्यादि
स्थ्लवर्णनं॥कुरंगैरुत्तरंगाक्षैःस्तब्धकर्णैरुदीक्षितं॥३८॥भाविकंभूतभाव्यर्थसाक्षात्कारस्यवर्णनम्॥
अहंविलोकयेऽद्यापियुध्यंतेऽत्रसुरासुराः॥३९॥उदात्तमृद्धेश्चरितंश्लाघ्यंचान्योपलक्षणं॥सानो
र्यत्राभवद्युध्दंतद्धूर्जटिकिरीटिनोः॥४०॥अत्युक्तिरद्भुताऽतथ्यशौर्यौदार्यादिवर्णनं॥अर्थदातरिराजें
द्रेयाचकाःकल्पशाखिनः॥४१॥निरुक्तिर्योगतोनाम्नामन्वर्थत्वप्रकल्पनं॥ईदृशैश्चरितैर्जानेसत्यं

क्षि

७

दोषाकरोभवान्॥४२॥प्रतिषेधःप्रसिद्धस्यनिषेधस्यानुकीर्तनात्॥नद्यूतमेतत्कितवक्रीडनंनिशितैःशरैः॥४३॥
सिद्धस्यैवविधानंयत्तदाहुर्विध्यलंकृतिम्॥पंचमोदंचनेकालेकोकिलःकोकिलोभवेत्॥४४॥हेतोर्हेतुमता
सार्धंवर्णनंहेतुरुच्यते॥असावुदेतिशीतांशुर्मानच्छेदायसुभ्रुवां॥४५॥हेतुहेतुमतोरैक्यंहेतुंकेचि
त्प्रचक्षते॥लक्ष्मीविलासाविदुषांकटाक्षावेंकटप्रभोः॥४६॥इत्थंशतमलंकारालक्षयित्वानिदर्शि
ताः॥प्राचामाधुनिकानांचमतान्यालोच्यसर्वतः॥४७॥चत्वारोरसवत्प्रेयऊर्जस्विचसमाहि
तं॥भावस्यचोदयःसंधिःशबलत्वमितित्रयः॥४८॥अष्टौप्रमाणालंकाराःप्रत्यक्षप्रमुखाःक्रमा
त्॥एवंपंचदशान्यानलंकारान्विदुर्बुधाः॥४९॥मुनिर्जयतियोगींद्रोमहात्माकुंभसंभवः॥येनै
कचुलुकेदृष्टौदिव्यौतौमत्स्यकच्छपौ॥५०॥कदावाराणस्याममरतटिनीरोधसिवसन्वसानःकौपी
नंशिरसिनिदधानोंऽजलिपुटं॥अयेगौरीनाथत्रिपुरहरशंभोत्रिनयनप्रसीदेत्याक्रोशन्निमिष
मिवनेष्यामिदिवसान्॥५१॥प्रेयः॥त्वत्प्रत्यर्थिवसुंधरेशतरुणीसंत्रासतःसत्वरंयांतीवीरवि

लुंठितुं सम्भ्रसंयाताः किराता वने॥ तिष्ठंति स्तिमिताः प्रगाढपुलकास्ते विस्मृतोपक्रमास्तासामुन्नरलैः स्तनैरति-
तरां लोलैरपांगैरपि॥ ५२॥ ऊर्जस्वि॥ पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालंबितं किं मां नालपतीत्य-
याभि यं खलु शठः कोपस्तयालंबितः॥ इत्यन्योन्यविलक्ष्यदृष्टि चतुरे तस्मिन्नवस्थांतरे सव्याजं हसितं मया धृ-
तिहृतो बाष्पस्तु मुक्तस्तया॥ ५३॥ समाहितं॥ तदद्य विश्रम्य दयालुरेधि मे दिनं निनीषामि भवद्विलोकि-
विलिख्य ते॥ अहार्यपादेन पात्रेणानवैव रूपेण समः समन्वियः॥ ५४॥ भावोदयः॥ एकाभ्रकुसुमायुधे-
षिधिरिव प्रव्यक्तपुंखावली जेतुं मंगलपालिकेव पुलकैरन्याकपोलस्थली॥ लोलाक्षीक्षणमात्रभा-
विविरहक्लेशासहां पश्यतो द्रागाकर्णयतश्च वीरभवतः प्रौढाहवाडंबरं॥ ५५॥ भावसंधिः॥ क्वाका-
यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय नः श्रुतमहो कोपेपि कांतं मुखं॥ किं व-
क्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योधरं धास्यति॥
५६॥ भावशबलता॥ प्रमाणालंकारेषु प्रत्यक्षं यथा॥ कांतं कांतवदनप्रतिबिंबे भग्नबालसहका ८

रसुगंधो ॥ स्वादुनिप्रबुदितालिनिशीते निर्विवारमधुनींद्रियवर्गः ॥ ५७ ॥ अनुमानं ॥ यथारंध्रंव्योम्नभ्रज्वलजल
दधूमः स्थगयति स्फुलिंगानां रूपं दधति च यथा कीटमणयः ॥ यथाविद्युज्ज्वालोल्लसितपरिपिंगाश्च ककुभस्त
धामन्ये लग्नः पथिकतरुखंडे स्मरदवः ॥ ५८ ॥ उपमानं ॥ तारोहिणीं विजानीहि ज्योतिषामत्र मंडले ॥ यस्तान्वितार
कान्यासः शकटाकारमाश्रितः ॥ ५९ ॥ शब्दः ॥ विवक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रतिसाधुभाषितं ॥ य
मामनंत्यात्मभुवोपि कारणं कथं स लक्ष्यप्रभवो भविष्यति ॥ ६० ॥ स्मृतिः ॥ वशीकुरु तपापानि संयुतान्यकृता
निवः ॥ सर्वान्विलक्षणतानर्थानकृतान्मनुरब्रवीत् ॥ ६१ ॥ आचारः ॥ महाजनाचारपरंपरेदृशी स्वनाम नामाद
धते न साधवः ॥ अतोभिधातुं न तदुत्सहे पुनर्जनः किलाचारमुचं विगायति ॥ ६२ ॥ आत्मतुष्टिः ॥ असंशयं क्षत्र
परिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ॥ सतां हि संदेहपदेषु वस्तुषु प्रमाणमंतःकरणप्रवृत्तयः ॥ ६३ ॥ श्रु
तिः ॥ त्वं ते नाम्नैव वरदो नाधत्से वरमुद्रिकां ॥ न हि श्रुतिप्रसिद्धार्थे लिंगमाद्रियते बुधः ॥ ६४ ॥ लिंगं ॥ विदि
तं वो न मे स्वार्थमि[illegible]ः काश्चित्प्रवृत्तयः ॥ न तु मार्तभिरष्टाभिरित्थंभूतोस्मि सूचितः ॥ ६५ ॥ अर्थापत्तिः ॥
नेवे

६३३८

निर्णेतुं शक्यमस्तीति मध्यं तव नितंबिनि ॥ अन्यथा नोपपद्येत पयोधरभरस्थितिः ॥ ६६ ॥ अनुपलब्धिः ॥ स्फुटमस
द्विलग्नं तन्वि निश्चिन्वते ते तदनुपलभमानास्तर्कयंतोपि लोकाः ॥ कुचगिरिवरयुग्मं यद्विनाधारमास्ते तदिह
मकरकेतोरिंद्रजालं प्रतीमः ॥ ६७ ॥ संभवः ॥ अभूतपूर्वं मम भाविकिंवा सर्वं सहे मे सहजं हि दुःखं ॥ किंतु त्व
दग्रे शरणागतानां पराभवो नाथ न तेनुरूपः ॥ ६८ ॥ ऐतिह्यं ॥ कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ॥ एति
जीवंतमानंदो नरं वर्षशतादपि ॥ ६९ ॥ संसृष्टिर्यथा ॥ कुसुमसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशो
भया ॥ चलितया विदधे कलमेखलाकलकलोलकलोलदृशान्यया ॥ ७० ॥ अंगांगीभावसंकरो यथा ॥ त
लेषु वेपंतमहीरुहाणां छाया तदा मारुतकंपितानां ॥ शशांककोसिं हेन तमोगजानां लूनाकृतीनामिव गात्रखंडः ॥ ७१ ॥
समप्राधान्यसंकरः ॥ अवतु नः सवितुस्तुरगावली समतिलंघिततुंगपयोधरा ॥ स्फुरितमध्यगतारुणनायका म
रकतैककलेव नभःश्रियः ॥ ७२ ॥ संदेहसंकरः ॥ शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुक
न्यावतीर्णा ॥ इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥ ७३ ॥ संकराणां संकरः ॥
मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः प्रातः प्रांगणसीम्नि मंथरचलद्बालांघ्रिलाक्षारुणाः ॥ दूराद्दा
डिमबीजशंकितधियः कर्षंति केलीशुकाः यद्विद्व
द्भवनेषु भोजनृपतेस्तत्यागलीलायितं ॥ ७४ ॥ ॥ इति कुवलयानंदकारिकाः समाप्ताः ॥ ॥ श्रीशिवौ जयतः ॥

९

K K S U LIBRARY
RAMTEK
441 106
M-1712
Dist. Nagpur

```
[OrderDescription]
,CREATED=05.10.20 11:45
,TRANSFERRED=2020/10/05 at 11:47:17
,PAGES=18
,TYPE=STD
,NAME=S0003841
,Book Name=M-1712-KUVLYANANDKARIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,
```